# ॥ भाग्य-सूक्तम् ॥ (तैत्तिरीय ब्राह्मण 2-8-9-7)

प्रातरग्निं प्रातरिन्द्रग्ं हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना ।

प्रातर्भगं पूषणं ब्रह्मणस्पतिं  प्रातस्सोममुत रुद्रग्ं हुवेम ॥

प्रातर्जितं भगमुग्रग्ं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।

आद्ध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥

भग प्रणेत-र्भग सत्यराधो भगेमां धियमुदवददन्नः।

भगप्रणो जनय गोभि-रश्वैर्भग प्रनृभिर्-नृवन्तस्स्याम ॥

उतेदानीं भगवन्तस्यामोत प्रपित्व उत मध्ये अह्नाम् ।

उतोदिता मघवन्थ्सूर्यस्य वयं देवानाग्ं सुमतौ स्याम ॥

भग एव भगवाग्ं अस्तु देवास्तेन वयं भगवन्तस्स्याम ।

तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ॥

समध्वरायोषसोऽनमन्त दधिक्रावेव शुचये पदाय ।

अर्वाचीनं वसुविदं भगन्नो रथमिवाश्वा वाजिन आवहन्तु ॥

अश्वावती-र्गोमती-र्न उषासो वीरवतीस्सद-मुच्छन्तु भद्राः ।

घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिस्सदा नः ॥

यो माऽग्ने भागिनग्ं सन्त-मथाभागं चिकीऋषति ।

अभागमग्ने तं कुरु मामग्ने भागिनं कुरु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# || bhāgya-sūktam || (taittirīya brāhmaṇa 2-8-9-7)

prātaragniṃ prātarindragṃ havāmahe prātarmitrā varuṇā prātaraśvinā |

prātarbhagaṃ pūṣaṇaṃ brahmaṇaspatiṃ prātassomamuta rudragṃ huvema |

prātarjitaṃ bhagamugragṃ huvema vayaṃ putramaditeryo vidhartā |

āddhraścidyaṃ manyamānasturaścidrājā cidyaṃ bhagaṃ bhakṣītyāha |

bhaga praṇeta-rbhaga satyarādho bhagemāṃ dhiyamudavadadannaḥ |

bhagaprano janaya gobhi-raśvairbhaga pranṛbhir-nṛvantassyāma |

utedānīṃ bhagavantasyāmota prapitva uta madhye ahnām |

utoditā maghavanthsūryasya vayaṃ devānāgṃ sumatau syāma |

bhaga eva bhagavāgṃ astu devāstena vayaṃ bhagavantassyāma |

taṃ tvā bhaga sarva ijjohavīmi sano bhaga pura etā bhaveha |

samadhvarāyoṣaso'namanta dadhikrāveva śucaye padāya |

arvācīnaṃ vasuvidaṃ bhaganno rathamivāśvā vājina āvahantu |

aśvāvatī-rgomatī-rna uṣāso vīravatīssada-mucchantu bhadrāḥ |

ghṛtaṃ duhānā viśvataḥ prapīnā yūyaṃ pāta svastibhissadā naḥ |

yo mā'gne bhāginagṃ santa-mathābhāgaṃ cikīrṣati |

abhāgamagne taṃ kuru māmagne bhāginaṃ kuru ||

oṃ śāntiḥ śāntiḥ śāntiḥ ||